# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः –** साहित्यम् (अलङ्कारवर्गः) | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – चित्रमीमांसा** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्यां कुरुत ।**

१ आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः इति तल्लक्षणम् उक्तम् । तत्र शङ्क्यते- निरीक्ष्य विद्युन्नयनैः इत्यादिषु उदाहरणेषु आरोप्यमाणानां तरण्यनयनप्रसूनानां तरणनिरीक्षणावतंसन-रूपप्रकृतकार्योपयोगे सत्यप्युक्तलक्षण-कृतालङ्कारसर्वस्व-कारणैव रूपकमङ्गीक्रियेत ।

२ चक्रभ्रमणकरत्वात् कुदृष्टिभिर्दूरवर्ज्यमानत्वात् ।
श्रुत्यन्तखेलनत्वान्मशक त्वामेव माधवं मन्ये ॥

३ एवं च आरोप्यमाणमारोप्यविषयात्मतया स्थितम् ।
प्रकृतस्योपयोगि स्यात्परिणाम उदाहृतः ॥

४ अत्रेदं विचारणीयम्- साम्यादिति किमन्नाद्धेतोर्वसतीतिवत्फलत्वेन हेतुत्वविवक्षया पञ्चमी, उत स्वतो हेतुत्वविवक्षया । आद्येऽप्रकृतसाम्याभिव्यक्तिफलत्वमर्थः स्यात् ।

**प्रश्नः २** परिणामालङ्कारं सभेदं ग्रन्थोक्तदिशा निरूपयत ।

**प्रश्नः ३** ससन्देहालङ्कारस्य सभेदं निरूपणं कुरुत ।

**प्रश्नः ४** भ्रान्तिमान् अलङ्कारः लक्षणोदाहरणसहितः लेख्यः ।

**प्रश्नः ५** उल्लेखः कः ? लक्षणोदाहरणपूर्वकं लिखत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ बालेन्दुवक्त्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि ।
सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् ॥

२ उवाह या तनुलता भृङ्गालीरोमवल्लरीम् ।
पश्चाद्विमुक्तां वैमल्याद्विम्बितामिव वेणिकाम् ॥

३ यद्यनुष्णो भवेद्वह्निर्यद्यशीतं भवेज्जलम् ।
मन्ये दृढव्रतो रामस्तदा स्यादप्यसत्यवाक् ॥

४ विरक्तसन्ध्याकपिशं पुरस्ताद्यतो रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥

**प्रश्नः ७** उत्प्रेक्षालङ्कारं चित्रमीमांसानुसारं सभेदं लिखत ।

**प्रश्नः ८** उत्प्रेक्षायाः अनुमानादिष्वलङ्कारेषु अतिव्याप्तिर्न भवतीति अप्पयदीक्षितमतं लिखत ।

**प्रश्नः ९** अपह्नुति-अलङ्कारं ग्रन्थोक्तदिशा लिखत ।

**प्रश्नः १०** अतिशयोक्त्यलङ्कारः ग्रन्थानुसारं लिख्यः ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ चित्रमीमांसायाः कर्ता कः अस्ति ?

२ परिणामः कतिविधः ? कश्च सः ?

३ अप्पयदीक्षितानुसारं वैयधिकरण्यम् अन्यत्र कुत्र भवति ?

४ ससन्देहः कतिविधः ? कश्च सः ?

५ इतो गता सा क्व गता न जाने गृहं गता मे हृदयं गता वा इत्यत्र ससन्देहः भवति न वा ?

६ कविसम्मतसादृश्याद्विषये आरोप्यमाणस्य अनुभवे कः अलङ्कारः ?

७ एकस्य वस्तुनः निमित्तभेदाद् अनेकधा अनेकेन उल्लेखनेन कः अलङ्कारः ?

८ अनेकधा इति उक्त्वा कस्य अलङ्कारस्य निषेधः क्रियते ?

९ कतिविधः उल्लेखः ? कश्च सः ?

१० यस्तपोवनमिति मुनिभिः, कामायतनमिति वेश्याभिः इत्यत्र कः अलङ्कारः ?

११ रूपकसङ्कीर्णः, श्लेषसङ्कीर्णः, उपमासङ्कीर्णः इति कस्य अलङ्कारस्य भेदाः ?

१२ प्रकृतस्य निषेधेन अन्यस्थापने कः अलङ्कारः ?

१३ यत्र प्रकृतम् अन्यधर्मसम्बन्धात् अन्यधर्मत्वेन उपतर्कितं भवति तत्र कः अलङ्कारः ?

१४ तर्कयामि, संभावयामि, जाने, स्यात् इत्यादिभिः शब्दैः कः अलङ्कारो ज्ञायते ?

१५ कविप्रौढोक्तिजीविता का ?

****